শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ত্রযোদশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ত্রযোদশঃ সর্গঃ ॥

## মহাপার্শ্ব্েন সীতাং প্রতি বলাৎকারং কর্তুং রাৱণস্য প্রোৎসাহনং রাৱণেন শাপৱশাৎ তথাকরণে স্বকীযাসমর্থতাযাঃ প্রতিপাদনং নিজপরাক্রমস্য প্রশংসনং চ

রাৱণং ক্রুদ্ধমাজ্ঞায মহাপার্শ্ৱো মহাবলঃ।
মুহূর্তমনুসঞ্চিন্ত্য প্রাঞ্জলির্ৱাক্যমব্রৱীৎ॥ **6.13.1** ॥

যঃ খল্ৱপি ৱনং প্রাপ্য মৃগৱ্যালনিষেৱিতম্।
ন পিবেন্মধু সম্প্রাপ্য স নরো বালিশো ভৱেৎ॥ **6.13.2** ॥

ঈশ্ৱরস্যেশ্ৱরঃ কোঽস্তি তৱ শত্রুনিবর্হণ।
রমস্ৱ সহ ৱৈদেহ্যা শত্রূনাক্রম্য মূর্ধসু॥ **6.13.3** ॥

বলাৎ কুক্কুটৱৃত্তেন প্রৱর্তস্ৱ মহাবল।
আক্রম্যাক্রম্য সীতাং ৱৈ তাং ভুঙ্ক্ষ্ৱ চ রমস্ৱ চ॥ **6.13.4** ॥

লব্ধকামস্য তে পশ্চাদাগমিষ্যতি কিং ভযম্।
প্রাপ্তমপ্রাপ্তকালং ৱা সর্ৱং প্রতিৱিধাস্যসে॥ **6.13.5** ॥

কুম্ভকর্ণঃ সহাস্মাভিরিন্দ্রজিচ্চ মহাবলঃ।
প্রতিষেধযিতুং শক্তৌ সৱজ্রমপি ৱজ্রিণম্॥ **6.13.6** ॥

উপপ্রদানং সান্ত্ৱং ৱা ভেদং ৱা কুশলৈঃ কৃতম্।
সমতিক্রম্য দণ্ডেন সিদ্ধিমর্থেষু রোচযে॥ **6.13.7** ॥

ইহ প্রাপ্তান্ ৱযং সর্ৱাংস্ত্রূংস্তৱ মহাবল।
ৱশে শস্ত্রপ্রতাপেন করিষ্যামো ন সংশযঃ॥ **6.13.8**॥

এৱমুক্তস্তদা রাজা মহাপার্শ্ৱেন রাৱণঃ।
তস্য সম্পূজযন্ ৱাক্যমিদং ৱচনমব্রৱীৎ॥ **6.13.9**॥

মহাপার্শ্ৱ নিবোধ ৎৱং রহস্যং কিঞ্চিদাত্মনঃ।
চিরৱৃত্তং তদাখ্যাস্যে যদৱাপ্তং পুরা মযা॥ **6.13.10**॥

পিতামহস্য ভৱনং গচ্ছন্তীং পুঞ্জিকস্থলাম্।
চঞ্চূর্যমাণামদ্রাক্ষমাকাশেঽগ্নিশিখামিৱ॥ **6.13.11**॥

সা প্রসহ্য মযা ভুক্তা কৃতা ৱিৱসনা ততঃ।
স্ৱযম্ভূভৱনং প্রাপ্তা লোলিতা নলিনী যথা॥ **6.13.12**॥

তচ্চ তস্য তথা মন্যে জ্ঞাতমাসীন্মহাত্মনঃ।
অথ সঙ্কুপিতো ৱেধা মামিদং ৱাক্যমব্রৱীৎ॥ **6.13.13**॥

অদ্যপ্রভৃতি যামন্যাং বলান্নারীং গমিষ্যসি।
তদা তে শতধা মূর্ধা ফলিষ্যতি ন সংশযঃ॥ **6.13.14**॥

ইত্যহং তস্য শাপস্য ভীতঃ প্রসভমেৱ তাম্।
নারোহযে বলাৎ সীতাং ৱৈদেহীং শযনে শুভে॥ **6.13.15**॥

সাগরস্যেৱ মে ৱেগো মারুতস্যেৱ মে গতিঃ।
নৈতদ্ দাশরথির্ৱেদ হ্যাসাদযতি তেন মাম্॥ **6.13.16**॥

কো হি সিংহমিৱাসীনং সুপ্তং গিরিগুহাশযে।
ক্রুদ্ধং মৃত্যুমিৱাসীনং প্রবোধযিতুমিচ্ছতি॥ **6.13.17**॥

ন মত্তো নির্গতান্ বাণান্ দ্ৱিজিহ্ৱান্ পন্নগানিৱ।
রামঃ পশ্যতি সঙ্গ্রামে তেন মামভিগচ্ছতি॥ **6.13.18**॥

ক্ষিপ্রং ৱজ্রসমৈর্বাণৈঃ শতধা কার্মুকচ্যুতৈঃ।
রামমাদীপযিষ্যামি উল্কাভিরিৱ কুঞ্জরম্॥ **6.13.19**॥

তচ্চাস্য বলমাদাস্যে বলেন মহতা ৱৃতঃ।
উদিতঃ সৱিতা কালে নক্ষত্রাণাং প্রভামিৱ॥ **6.13.20**॥

ন ৱাসৱেনাপি সহস্রচক্ষুষা
যুধাস্মি শক্যো ৱরুণেন ৱা পুনঃ।
মযা ৎৱিযং বাহুবলেন নির্জিতা
পুরা পুরী ৱৈশ্রৱণেন পালিতা॥ **6.13.21**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে ত্রযোদশঃ সর্গঃ॥